| | |
|---|---|
| यस्मादर्वाक्संवत्सरः अहोभिः परिवर्तते । | yasmādarvāksṁvatsaraḥ ahobhiḥ parivartate |
| तद्देवा ज्योतिषां ज्योतिः आयुर्होपासतेऽमृतम् | taddevā jyotiṣām̐ jyotiḥ āyurhopāsate’mṛtam **16** |
| ॥ १६ ॥ यस्मिन्पञ्च पञ्चजनाः आकाशश्च | yasminpañca pañcajanāḥ ākāśaśca |
| प्रतिष्ठितः । तमेव मन्य आत्मानं | pratiṣṭhitaḥ tameva manya ātmānaṁ |
| विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥ | vidvānbrahmāmṛtomṛtam **17** |
| प्राणस्य प्रणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं | prāṇasya praṇamuta cakṣuṣaścakṣuruta śrotrasya śrotraṁ |
| मनसो ये मनो विदुः । | manaso ye mano viduḥ |
| ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥ | te nicikyurbrahma purāṇamagryam **18** |
| मनसैवानुद्रष्टव्यम् नेह नानास्ति किंचन । | manasaivānudraṣṭavyam neha nānāsti kiṁcana |

| | |
|---|---|
| मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति | mṛtyoḥ sa mṛtyumāpnoti ya iha nāneva paśyati 19 |
| ॥ १९ ॥ एकधैवानुद्रष्टव्यम् एतदप्रमयं ध्रुवम् । | ekadhaivānudraṣṭavyam etadapramayaṁ dhruvam |
| विरजः पर आकाशाद् अज आत्मा महान्ध्रुवः | virajaḥ para ākāśād aja ātmā mahāndhruvaḥ 20 |
| ॥ २० ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः | tameva dhīro vijñāya prajñāṁ kurvīta brahmaṇaḥ |
| । नानुध्यायाद्बहूञ्छब्दान् वाचो | nanudhyāyādbahūñchabdān vāco |
| विग्लापनꣳहितत् ॥ इति ॥ २१ ॥ | viglāpanagṁhitat iti 21 |
| स वा एष महान् अज आत्मा योऽयं विज्ञानमयः | sa vā eṣa mahān aja ātmā yo’yaṁ vijñānamayaḥ |
| प्राणेषु य एषोऽन्तर्हृदयाकाशः तस्मिन् शेते सर्वस्य | prāṇeṣu ya eṣo’ntarhṛdayākāśaḥ tasmin śete sarvasya |
| वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना | vaśī sarvasyeśānaḥ sarvasyādhipatiḥ sa na sādhunā |

| | |
|---|---|
| कर्मणा भूयान् नो एव असाधुना कनीयान् | karmaṇā bhūyān no eva asādhunā kanīyān |
| एष सर्वेश्वरः एष भूताधिपतिः एष भूतपालः एष | eṣa sarveśvaraḥ eṣa bhūtādhipatiḥ eṣa bhūtapālaḥ eṣa |
| सेतुर्विधरण एषां लोकानाम् असंभेदाय तमेतं | seturvidharaṇa eṣāṁ lokānām asaṁbhedāya tametaṁ |
| वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन दानेन | vedānuvacanena brāhmaṇāḥ vividiṣanti yajñena dānena |
| तपसा अनाशकेन एतमेव विदित्वा मुनिर्भवति । | tapasā anāśakena etameva viditvā munirbhavati |
| एतमेव प्रव्राजिनः लोकमिच्छन्तः प्रव्रजन्ति । | etameva pravrājinaḥ lokamicchantaḥ pravrajanti |
| एतद्धस्मवैतत् पूर्वे विद्वांसः प्रजां न कामयन्ते | etaddhasmavaitat pūrve vidvāṁsaḥ prajāṁ na kāmayante |
| किं प्रजया करिष्यामाः येषां नः | kiṁ prajayā kariṣyāmāḥ yeṣāṁ naḥ |
| अयम् आत्मा अयम् लोकः इति | ayam ātmā ayam lokaḥ iti |
| तेहस्म पुत्रैषणायाश्च वित्तैषणैयाश्च लोकैषणैयाश्च | tehasma putraiṣaṇaiyāśca vittaiṣaṇaiyāśca lokaiṣaṇaiyāśca |

| | |
|---|---|
| व्युत्थाय अथ भिक्षाचर्यं चरन्ति | vyutthāya atha bhikṣācaryaṁ caranti |
| या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा | yā hyeva putraiṣaṇā sā vittaiṣaṇā yā vittaiṣaṇā sā |
| लोकैषणा उभे ह्येते एषणे एव भवतः । | lokaiṣaṇā ubhe hyete eṣaṇe eva bhavataḥ |
| स एष नेति नेत्यात्मा अगृह्यो नहि गृह्यते | sa eṣa neti netyātmā agṛhyo nahi gṛhyate |
| अशीर्यों नहि शीर्यते असङ्गो नहि सज्यते | aśīryo nahi śīryate asaṅgo nahi sajyate |
| असितो न व्यथते न रिष्यति | asito na vyathate na riṣyati |
| एतमु हैवैते न तरत इति - अतः पापमकरवमिति | etamu haivaite na tarata iti - ataḥ pāpamakaravamiti |
| अतः कल्याणमकरवमिति उभे उ हैवैष | ataḥ kalyāṇmakaravamiti ubhe u haivaiṣa |
| एते नतरिति नैनं कृताकृते तपतः ॥ २२ ॥ | ete natariti nainaṁ kṛtākṛte tapataḥ 22 |